तन, द न उ विस्तृतौ। इति कविकल्पद्रुमः॥ (तनां-उभं-सकं-सेट्। उदित्वात् क्त्वावेट्।) द न, तनोति तनुते पुण्यं ऋषिः। उ, तनित्वा तत्वा। इति दुर्गादासः॥

तनयः, पुं, (तनोति विस्तारयति कुलमिति। तन्+"बलिमलितनिभ्यः कयन्।" उणां। ४। ९९। इति कयन्।) पुत्त्रः। इत्यमरः। २। ६। २७॥ (यथा, मनुः। ३। १६।
"शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च॥")

तनया, स्त्री, (तनोति कुलमिति। तन+कयन्+टाप्।) कन्या। इत्यमरः। २। ६। २७॥ (यथा, भागवते। १। १६। २।
"स उत्तरस्य तनयामुपयेमे इरावतीम्॥")
चक्रकुल्यालता। इति शब्दचन्द्रिका॥

तनिष्ठः, त्रि, अयमनयोरतिशयेन तनुः। (तनु+इष्ठन्।) क्षुद्रः। इति व्याकरणम्॥

तनीयान् [स्] त्रि, अयमेषामतिशयेन तनुः। (तनु+ईयसुन्।) अल्पः। इति व्याकरणम्॥

तनुः, स्त्री, (तनोति तन्यते इति वा। तन+"भ्रन्दशीतृचरीति।" उणां।१।७। इति उः।) शरीरम्। (यथा, विष्णुपुराणे। १। १७। ५।
"देवाः स्वर्गं परित्यज्य तत्प्रासादात् सुनिश्चलम्। विचेरुरवनौ सर्व्वे बिभ्राणा मानुषीं तनुम्॥")
त्वक्। इति मेदिनी। ने, ८॥ स्त्री। इति राजनिर्घण्टः॥

तनुः, त्रि, (तन+"भ्रन्दशीति।" उणां १। ७। इत्युः।) अल्पः। विरलः। (यथा, मनुः।३।१०।
"तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत् स्त्रियम्॥")
कृशः। इति मेदिनी। ने, ८॥ (यथा, आर्य्यासप्तशत्याम्। ५२५।
"वितरन्ती रसमन्तर्म्मार्द्दभावं तनोषि तनुगात्रि!॥")

तनुः, [स्] क्ली, (तनोति तन्यते वा। तन+"अर्त्तिपृवपियजितनिधनितपिभ्यो नित्।" उणां २। ११८। इति उसिः स च नित्।) शरीरम्। इत्युणादिकोषः॥

तनुक्षीरः, पुं, (तनौ क्षीरं बहुलनिर्य्यासो यस्य।) आम्रातकः। इति राजनिर्घण्टः॥

तनुच्छायः, पुं, (तनुर्विरला स्वल्पा छाया यस्य।) बालबब्बूरवृक्षः। इति राजनिर्घण्टः॥ (तनोश्छाया।) शरीरच्छायायां स्त्री क्ली च॥

तनुजः, पुं, (तनोः शरीरात् जायते इति। जन+"अन्येष्वपि दृश्यते।" ३। २। १०१। इति डः।) पुत्त्रः। इति हलायुधः॥ (यथा, पञ्चतन्त्रे। ५। २२।
"कामी दैवि सुशिक्षितोऽपि बहुधा
प्रोज्झन्ति सद्बान्धवा
धोतन्ते न गुणाश्रयञ्जन्ति तनुजाः
स्फारीभवत्सम्पदः।
भार्य्या नो तमवंशजापि भजते
नो यान्ति मित्राणि च
न्यायारोपितविक्रमानपि नरान् येषां
न हि स्याद्धनम्॥")

तनुजा, स्त्री, (तनोः शरीरात् जायते इति। जन+डः+टाप्।) कन्या। इति शब्दरत्नावली॥

तनुत्रं, क्ली, (तनुं त्रायते इति। त्रै+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) वर्म्म। इत्यमरः। २। ८। ६४॥

तनुत्राणं, क्ली, (त्रायतेऽनेनेति। त्रै+करणे ल्युट्। तनोः शरीरस्य त्राणम्।) तनुत्रम्। इति हलायुधः॥ (यथा, महाभारते। ३। १७४। ४।
"इदञ्च मे तनुत्राणं प्रायच्छन्मघवान् प्रभुः॥")
शरीररक्षणञ्च॥

तनुत्वचा, स्त्री, (तनुः तन्वी त्वक् वल्कलमस्याः।) क्षुद्राग्निमन्थः। इति राजनिर्घण्टः॥

तनुपत्रः, पुं, (तनूनि पत्राणि यस्य।) इङ्गुदीवृक्षः। इति राजनिर्घण्टः॥

तनुभस्त्रा, स्त्री, (तनोः शरीरस्य भस्त्रा इव। निश्वासवायुनिर्गमात्तथात्वम्।) नासिका। इति शब्दरत्नावली॥

तनुरसः, पुं, (तनोर्देहस्य रस इव तनोर्निर्गतो रस इति वा।) घर्म्मः। इति हारावली।१५४॥

तनुरुट्, [ह्] क्ली, (तनौ शरीरे रोहतीति। रुह+क्विप्।) तनूरुहम्। इति शब्दरत्नावली॥

तनुरुहं, क्ली, (तनौ रोहति उत्पद्यते इति। रुह+"इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः।) तनूरुहम्। इति शब्दरत्नावली॥

तनुलः, त्रि, (तन्यते स्म इति। तन+उलच्।) विस्तृतः। इति संक्षिप्तसारे उणादिवृत्तिः॥

तनुवातः, पुं, (तनुः क्षीणो वातः वायुर्यत्र।) नरकविशेषः। इति हेमचन्द्रः। ५। २॥

तनुबीजः, पुं, (तनु क्षीणं स्वल्पमात्रं वा बीजमस्य।) राजबदरः। इति राजनिर्घण्टः॥

तनुव्रणः, पुं, (तनुः क्षुद्रः स्वल्पः व्रणो यत्र।) वल्मीकरोगः। इति शब्दरत्नावली॥

तनुसञ्चारिणी, स्त्री, (तनु अल्पमात्रं यथा स्यात् तथा सञ्चरतीति। सम्+चर+णिनिः ङीप् च।) बालिका स्त्री। इति शब्दमाला॥

तनूः, स्त्री, (तनु+ऊङ्।) शरीरम्। इत्यमरः। २। ६। ७१॥

तनूकृतः, त्रि, (अतनुस्तनुरकारि। कृ+कर्म्मणि क्तः।) तष्टः। अल्पीकृतः। इत्यमरः।३।१।६६॥

तनूजः, पुं, (तन्वाः शरीरात् जायते इति। जन+डः।) पुत्त्रः। इति जटाधरः॥ (यथा, रघुः। ५। ५३।
"अवेहि गन्धर्व्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य॥"
स्त्री, कन्या॥)

तनूनपं, क्ली, (तन्वा ऊनं ह्रासं पातीति। पा+कः।) घृतम्। इति शब्दचन्द्रिका॥

तनूनपात्, [द्] पुं, (तनूनपं घृतं अत्तीति। अद्+विच् क्विबित्येके। यद्वा, तनूं स्वशरीरं न पातयतीति। पत+णिच्+क्विप्।"नभ्राण्नपात्." ६। ३। ७५। इति निपातितः।) अग्निः। (यथा, ऋग्वेदे। ३। २९। ११।
"तनूनपादुच्यते गर्भ आसुरो
नराशंसो भवति यद्विजायते॥")
चित्रकवृक्षः। इत्यमरः। २। ४। ८०॥

तनूरुहं, क्ली, (तन्वां रोहतीति। रुह+कः।) रोम। (यथा, भागवते। ७। ८। २२।
"चन्द्रांशुगौरैश्छुरितं तनूरुहै-
र्विष्वग्भुजानीकशतं नखायुधम्॥"
तथाच शिवपुराणे। वायुसंहितायाम्।१।१४।
"नमश्चकार तं दृष्ट्वा हृष्टसर्व्वतनूरुहः॥")
पतत्रम्। इति मेदिनी। हे, ३०॥

तनूरुहः, पुं, (तन्वाः शरीरात् रोहति उत्पद्यते। रुह+कः।) पुत्त्रः। गरुत्। (यथा, बृहत्संहितायाम्। ६३। १।
"कुक्कुटस्त्वृजुतनूरुहाङ्गुलि-
स्ताम्रवक्त्रनखचूलिकः सितः॥")
लोम। इति हेमचन्द्रः॥

तनूह्रदः, पुं, (तन्वाः तन्वां वा ह्रद इव।) पायुः। इति त्रिकाण्डशेषः॥

तनूच, उ हतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) उ, तञ्चित्वा तक्त्वा। इति दुर्गादासः॥

तनूच, उ ष सङ्कुचि। इति कविकल्पद्रुमः॥ (रुधां-परं-अकं-सेट्।) उ, तञ्चित्वा तक्त्वा। ष, तनच्मि व्योम विस्तृतम्। इति दुर्गादासः॥

तनूज, उ ष सङ्कोचे। इति कविकल्पद्रुमः॥ (रुधां-परं-अकं-सेट्।) उ, तञ्जित्वा तक्त्वा। ष, तनज्मि व्योम विस्तृतम्। इति दुर्गादासः॥

तन्तुः, पुं, (तन्यते विस्तीर्य्यते इति तनोति वा। तन+"सितनिगमीति।" उणां १। ७०। इति तुन्।) सूत्रम्। इत्यमरः।२।१०।२८॥ (यथा, महाभारते। १२। ४७। २२।
"यस्मिन् नित्यं तते तन्तौ दृढं स्रगिव तिष्ठति॥")
ग्राहः। इति हेमचन्द्रः॥ सन्ततिः। यथा,—
"अन्तःस्थः सर्व्वभूतानामात्मा योगेश्वरो हरिः।
स्वमाययावृणोद्गर्भं वैराट्याः कुरुतन्तवे॥"
इति श्रीभागवतम्॥

तन्तुकः, पुं, (तन्तुरिव तन्तुनेव वा कायतीति। कै+कः। तन्तु+संज्ञायां कन् वा।) तन्तुभः। सर्षपः। इत्यमरटीकायां रमानाथः॥ (यथा, सुश्रुते कल्पस्थाने ४ अध्याये। "पिङ्गलस्तन्तुकः पुष्पपाण्डुः षड्गोऽम्बिको वभ्रुकषायः॥")

तन्तुकाष्ठं, क्ली, (तन्तुसमन्वितं काष्ठम्।) तूली। इति शब्दरत्नावली॥ ताँतेर काट इति भाषा॥

तन्तुकी, स्त्री, (तन्तुरिव कायतीति। कै+कः ङीप् च।) नाड़ी। इति राजनिर्घण्टः॥

तन्तुकीटः, पुं, (तन्तूत्पादकः कीट इति शाकपार्थिववत् मध्यपदलोपी समासः।) कोषकारः। इति जटाधरः॥ गुटिपोका इति भाषा॥

तन्तुणः, पुं, (तन+बाहुलकात् तुनन् निपातनात् णत्वं दन्त्यनकारान्त इत्येके।) ग्राहः। इति हेमचन्द्रः॥ हाङ्गर इति भाषा॥